त्रिपुरास्तोत्रंकवचं

नं० १२७९

5739/2

जन्म र्जि

श्रीगणेशाय नमः ॥ सद्यः समुद्यतसहस्रदिवा ॥ श्रीसूत्यानया त्वां त्रिपुरे स्तोष्ये भीष्टफलाप्तये ॥ यया व्रजंति तां लक्ष्मीं
मनुजाः सुरपूजितां ॥ १ ब्रह्मादयस्तुतिपदैरपि स्त्वद्रूपां जानंति नैव जगदादिमनादिमूर्तिं ॥ तस्मादहं कुच
नतां नवकुंकुमाभां स्पष्टत्तां लसमः केसवलबालयमानभूताम् २ सद्यःसमुद्यतसहस्रदिवाकराभां विद्या
क्षसूत्रवरदाभयचिह्नहस्तां ॥ नेत्रोत्पलैस्त्रिभिरलंकृतवक्त्रपद्मां त्वां तारहाररुचिरां त्रिपुरे भजामः ॥ लिं
द्गरपुंजरुचिरं कुचभारनम्रं जन्मांतरेषु कृतपुण्यफलैकगम्यं ॥ अन्योन्यभेदकलहाकुलमानभेदे जा
नंति किं जडधियस्तव रूपमंब ३ स्थूलां वदंति मुनयः श्रुतयो गृणंति सूक्ष्मां वदंति वचसामपि वा
समन्ये ॥ त्वां मूलमाहुरपरे जगतां भवानि मन्यामहे वयमपारकृपांबुराशिं ॥ चंद्रावतंसकलितां शा
रदिंदुशुभ्रां पंचाशदक्षरमयीं हृदि भावयंति ॥ त्वां पुस्तकं जपवटीममृताढ्यकुंभं व्याख्यां च हस्तकम
लैर्दधतीं त्रिनेत्रां ४ शंभुस्त्वमद्रितनयाकलितार्द्धभागो विष्णुस्त्वमंब कमलापरिबद्धदेहः ॥ पद्मोद्भ
वस्त्वमसि वागधिवासभूमिरेषां क्रियाश्च जगति त्रिपुरे त्वमेव ॥ आश्रित्य वाग्भवभवांश्चतुरः परा
दीन्भावान्परेषु विहितार्थमुदीरयंतीं ॥ कंठादिभिश्च करणैः परदेवतां त्वां संविन्मयीं हृदि कदापि न वि
स्मरामि ५ आकुंच्य वायुमवजित्य च वैरिषट्कमालोक्य निश्चलधिया निजनासिकाग्रं ॥ ध्यायंति
मूर्द्धि कलितेंदुकलावतंसं त्वद्रूपमंब कृतिनस्तरुणार्कबिंबं ॥ त्वं प्राप्य मन्मथरिपोर्वपुरर्द्धभागं सृष्टिं
करोषि जगतामिति वेदवादः ॥

सत्यंतदद्रितनयेजगदेकमातर्नोचेदशेषजगतःस्थितिरेवनस्यात् ६ सृज्जांविधायकुसुमैःसुर
पादपानांपीठेतवांबकनकाचलगह्वरेषु ७ ॥ गायंतिसिद्धवनिताःसहकिन्नरीभिरास्वादितासव
रसारुणनेत्रपद्माः ८ विद्युद्विलासवपुषःश्रियमावहंतींयांतीस्ववासभवनाच्छिवराजधा
नी ॥ सौभाग्यमार्गकमलानिविकासयंतीदेवीभजेहृदिपरामृतसिक्तगात्री ८ आनंदज
ततं न्मभवनेंश्रुतीनांचैतन्यमात्रतनुमंबसमाश्रयामि ॥ ब्रह्मेशविष्णुमिरभिष्टुतपादपद्मा
सौभाग्यजन्मवसतिंत्रिजगेयथावत् ९ शब्दार्थभाविभुवनंसृजतींदुरूपायानहिभर्तिभव
खंतनुःस्वशक्त्या ॥ ब्रह्मात्मिकाहरतितत्सकलंयुगांतेतांशारदांमनसिजातुनविस्मरा
मि १० नारायणीतिनरकार्णवतारिणीतिगौरीतिखेदशमनीतिसरस्वतीति ॥ ज्ञानप्रदेति
नयनत्रयभूषितेतित्वामद्रिराजतनयेतिबुधावदंति ११ येस्तुवंतिजगन्मातःश्लोकैर्द्वाद
शभिःक्रमात् ॥ त्वामनुप्राप्यवाक्सिद्धिंप्राप्नुवंतिपरांगतिम् १२ ॥ १२ छ १२ ॥ श्रीदेव्यु
वाच देवदेवमहादेवभक्तानांप्रीतिवर्धनं सूचितंयन्महादेव्याः कवचंकथयस्व
मे श्रीमहादेवउवाच शृणुदेविप्रवक्ष्यामिकवचंदेवदुर्लभं अप्रकाश्यंपरंगुह्यंसा
धकाभीष्टदायकं कवचस्यऋषिर्देवीदक्षिणामूर्तिरव्ययः छंदः पंक्तिः सम्पुद्दृदे

वी त्रिपुरसुंदरी धर्मार्थ काममोक्षार्थं विनियोगस्तु साधने वाग्भवं का
मराजस्य शक्ति बीजं महेश्वरि ऐं वाग्भवं पातु शीर्षे मां क्लीं कामराजस्तथा
हृदि सौः शक्ति बीजं सदा पातु नाभौ गुह्ये च पादयोः ऐं क्लीं सौः वदने पातु
बाला मां सर्वसिद्धये हौं हसकलह्रीं पातु भैरवी कण्ठदेशतः सुंदरी
नाभिदेशे च्यार्च्ची र्षे कामकला सदा भ्रूनासयोरंतराले महा त्रिपुरसुंदरी
ललाटे सुभगा पातु भगा मां भगादेशतः भगोदया तु हृदये उदरे भगसर्पि
णी भगमाला नाभिदेशे लिंगे पातु मनोभवा गुह्ये पातु महादेवी रा
जराजेश्वरी शिवा चैतन्यरूपिणी पातु पादयोर्जगदंबिका नारायणी सर्व
गात्रे सर्वकार्ये शुभंकरी ब्रह्माणी पातु मां पूर्वे दक्षिणे वैष्णवी तथा पश्चि
मे पातु वाराही उत्तरे तु महेश्वरी आग्नेय्यां पातु कौमारी महालक्ष्मीश्च नै
ऋते वायव्यां पातु चामुंडा इंद्राणी पातु ईशके जले पातु महामाया पृथ्वी
व्यां सर्वमंगला आकाशे पातु वरदा सर्वत्र भुवनेश्वरी इदं तु कवचं देवा देवा
नामपि दुर्लभम् यः पठेत् प्रातरुत्थाय शुचिः प्रयतमानसः नार्थयो बाधयस्तस्य नम
ध यंच

क्वचिद्भवेत् नच मारीभयं तस्य पातकानां भयं तथा न रोग... वशं गच्छन्ति चै
गच्छेद्धि वपुरंदे वि सत्यं सत्यं वदाम्यहम् इदं कवचमज्ञा
मत्वा वशेनच सनाप्नोति फलं तस्य प्राप्नुयाच्छस्त्रघातनम्
त्वा श्री विद्यां यो जपेत्प्रिये
इति श्री रुद्रयामले त्रिपुरसुंदरीकवचं ॥